Sample Paper
Common Annual School Examination

Class- VI ( ) Subject- Sanskrit

Time- 2.30 Hours Max. Marks.- 50

Q. No	Description	M.M
	सामान्य-निर्देशाः 1. प्रश्नपत्रे चत्वारः खण्डाः सन्ति- खण्ड– 'क' अपठित–अवबोधनम् 10 अङ्का: खण्ड– 'ख' रचनात्मक–कार्यम् 8 अङ्का: खण्ड– 'ग' अनुप्रयुक्त–व्याकरणम् 12 अङ्का: खण्ड– 'घ' पठित–अवबोधनम् 20 अङ्का: 2. सर्वे प्रश्नाः अनिवार्याः सन्ति। 3. उत्तराणि संस्कृतेन एव लेखनीयानि। 4. प्रश्नानामुत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि। 5. प्रश्न-संख्या अवश्यमेव लेखनीया।	
1.	खण्डः- 'क' अपठित-अवबोधनम् (10 अङ्काः) गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत- अस्माकं विद्यालयः नदीतटे अवस्थितः अस्ति। अस्मिन् विद्यालये विंशति प्रकोष्ठाः सन्ति। तेषु एकः कार्यालयः अस्ति। विद्यालये चतुरशतं छात्राः पठन्ति। सर्वे छात्राः अनुशासिताः सन्ति। योग्याः शिक्षकाः छात्रान् स्नेहेन अध्यापयन्ति। विद्यालयस्य परिसरे एका सुसज्जिता पुष्पवाटिका अपि विद्यते। एकं क्रीडाक्षेत्रम् अपि अस्ति। तस्मिन् सर्वे छात्राः क्रीडन्ति। (अ) एकपदेन उत्तरत- (i) विद्यालयः कुत्र अवस्थितः अस्ति? (ii) विद्यालये कति प्रकोष्ठाः सन्ति? (iii) सर्वे छात्राः कीदृशाः सन्ति ?	1X4=4

(iv) विद्यालये कति छात्राः पठन्ति?

(ब) पूर्णवाक्येन उत्तरत - 2x2=4

(i) विद्यालयस्य परिसरे कीदृशी पुष्पवाटिका विद्यते?

(ii) योग्याः शिक्षकाः कान् स्नेहेन अध्यापयन्ति?

(स) यथानिर्देशम् उत्तरत- 1x2=2

(i) 'योग्याः शिक्षकाः' अत्र किं विशेषणपदं प्रयुक्तम् अस्ति?

(ii) 'एकं क्रीडाक्षेत्रम् अपि अस्ति।' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम् ?

खण्डः- 'ख'

रचनात्मक-कार्यम् (8 अङ्काः)

2. चित्रं दृष्ट्वा मंजूषातः पदानि चित्वा वाक्यानि पूरयित्वा पुनः लिखत- 1 x 4=4

(i) एषः .... अस्ति।

(ii) बिडालः.......... प्राणी अस्ति।

(iii) बिडालः ....पिबति।

(iv) बिडालः .... खादति।

मंजूषा-

मूषकम्, दुग्धम्, पोष्यः, बिडालः

अथवा

मंजूषातः पदानि चित्वा 'उद्यानम्' इति विषयम् अधिकृत्य वाक्यानि पूरयित्वा पुनः लिखत (केवलं दृष्टिबाधितछात्राणां कृते)-

मंजूषा-

पुष्पाणि, चटकाः, उद्यानम्, भ्रमन्ति

i. इदम् एकं सुन्दरम् .... अस्ति।

ii. अस्मिन् उद्याने विविधानि ....विकसन्ति।

iii. उद्याने .... छात्रा: कूजन्ति।

iv. उद्याने बहव: जना: ....।

3. मंजूषायां प्रदत्तानि उचितपदानि मेलयित्वा चत्वारि सार्थकवाक्यानि रचयत- 1 x4=4

1	2	3
अश्व:	पुष्पेषु	करोसि।
भ्रमरा:	राजमार्गे	गायामि।
अहम्	किं	धावति।
त्वं	गीतम्	गुञ्जन्ति।

खण्ड:- ‘ग’

अनुप्रयुक्त-व्याकरणम् (12 अङ्का:)

4. कोष्ठकात् उचितशब्दरूपं चित्वा वाक्यानि पूरयत - 1 x4=4

(i) गंगा .... निर्गच्छति। (हिमालयस्य/ हिमालयात्)

(ii) .... माता कौशल्या अस्ति। (रामस्य / रामात्)

(iii) .... ‘डॉल्फिन्’ इति मत्स्य: निवसन्ति। (गंगाया:/ गंगायाम्)

(iv) क्रीडका:............ क्रीडन्ति। (क्रीडाक्षेत्रे/ क्रीडाक्षेत्रस्य)

5. निर्देशानुसारं लकार परिवर्तनं कुरुत- 1X4=4

यथा - राम: वाचनालये वदति । (लङ् लकारे) - राम: वाचनालये अवदत्।

(i) श्याम: क्रीडाक्षेत्रे खेलति। (लृट् लकारे)

(ii) बाल: विद्यालयं गच्छति । (लृट् लकारे)

(iii) पवन: पुस्तकं पठति। (लङ् लकारे)

	(iv) सीता पत्रं लिखति। (लङ् लकारे)	
6.	अङ्कानां स्थाने संख्यापदैः रिक्तस्थानानि पूरयत– i. मंचे (5)------जनाः तिष्ठन्ति। ii. (2) -------- बालिके गीतानि रचयतः।	1 X2=2
7.	मंजूषातः उचित-अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत– तत्र, तथा, एव i. सत्यं .... जयते। ii. यथा माता............ पुत्री।	1 X2=2
8.	खण्डः– 'घ' पठित-अवबोधनम् (20 अङ्काः) गद्यांशं पठित्वा प्रश्नान् उत्तरत– अजीजं दृष्ट्वा स्वामी चकितः भवति। स्वामी शनैः शनैः पेटिकाम् उद्घाटयति। पेटिकायां लघुपात्रद्वयम् आसीत्। प्रथमं सः एकं लघुपात्रम् उद्घाटयति। सहसा एका मधुमक्षिका निर्गच्छति। तस्य च हस्तं दशति। स्वामी उच्चैः वदति–'अहह!। द्वितीयं लघुपात्रम् उद्घाटयति। एका अन्या मक्षिका निर्गच्छति। सः ललाटे दशति। पीडितः सः अत्युच्चैः चीत्करोति–'आः' इति। अजीजः सफलः आसीत्। स्वामी तस्मै अवकाशस्य वेतनस्य च पूर्णं धनं ददाति। (अ) एकपदन उत्तरत– i. अजीजं दृष्ट्वा कः चकितः भवति? ii. पेटिकायां किम् आसीत्? (ब) पूर्णवाक्येन उत्तरत– i. स्वामी अजीजाय किं ददाति? (स) यथानिर्देशम् उत्तरत– i. **<u>असफलः</u>** इति पदस्य किं विलोमपदं गद्यांश अस्ति– (क) चकितः (ख) सफलः (ग) पीडितः ii. अजीजः सफलः आसीत्।' अस्मिन् वाक्ये क्रियापदं किम् अस्ति।	1 x2=2 2 x1=2 1 x 2=2

9.	श्लोकं पठित्वा प्रश्नान् उत्तरत– सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु। सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु।। (अ) एकपदेन उत्तरत– i. कः सर्वत्र नन्दतु? ii. सर्वः कानि तरतु? (ब) पूर्णवाक्येन उत्तरत– i. सर्वः कान् अवाप्नोतु? (स) यथानिर्देशम् उत्तरत- i. 'एकत्र' अस्य विलोमपदं श्लोकात् चित्वा लिखत? ii. 'पश्यतु' अत्र कः लकारः?	 1 x2=2 2 x1=2 1 x 2=2
10.	अधोलिखितशब्दानां कृते संस्कृतपदानि मंजूषातः चित्वा लिखत- दिवा, कन्दुकम्, नायकः, सद्यः (i) शीघ्र - .... (ii) दिन- .... (iii) गेंद - .... (iv) नेता -	1 x 4=4
11.	विलोमपदानि मेलयत- i. प्रविशति (क) सायम् ii. दुःखितः (ख) मूर्खः iii. प्रातः (ग) प्रसन्नः iv. चतुरः (घ) निर्गच्छति	1 x 4=4